# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## अभ्यास–प्रश्नपत्रम्– 2025-26

## कक्षा- दशमी संस्कृतम् (कोड-122)

**अवधिः– होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | | |
|---|---|---|
| खण्डः- क | अपठितांश – अवबोधनम् | 10 अङ्काः |
| खण्डः- ख | रचनात्मककार्यम् | 15 अङ्काः |
| खण्डः- ग | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| खण्डः- घ | पठित-अवबोधनम् | 30 अङ्काः |

### खण्डः- क

### अपठितांश – अवबोधनम् 10 अङ्काः

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 10**

प्रातःकाले उदीयमानः सूर्यः सम्पूर्णं जगत् प्रकाशते। सूर्यस्य किरणैः पृथिव्याः सर्वे प्राणिनः ऊर्जां प्राप्नुवन्ति। सूर्यं विना जीवनं न सम्भवति। अतः एव प्राचीने भारते सूर्यं देवता इति रूपेण पूज्यते स्म। सूर्यस्य उपासनया मनः शान्तं भवति, शरीरं स्वास्थ्यं च लभते। यदि वयं प्रकृतेः नियमान् पालयामः तर्हि नूनमेव अस्माकं जीवनं सुखदं भवेत्। मनुष्यः यदि प्रतिदिनं प्रातःकाले सूर्यनमस्कारं करोति, तस्य शरीरं दृढं भवति, मनः प्रसन्नं च। सूर्योपासनेन आत्मबलं वर्धते, आलस्यं नश्यति, कर्मण्यता वर्धते च। आधुनिककाले अपि चिकित्सकाः वदन्ति यत् सूर्यप्रकाशस्य सेवनं स्वास्थ्याय अत्यावश्यकम् अस्ति, अनेन अस्माकं जीवनं सुखमयं, दीर्घायुष्यमयं च भविष्यति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

(i) सूर्यः सम्पूर्णं जगत् किं करोति?

(ii) कं विना जीवनं न सम्भवति??

DoE, Delhi

(iii) कस्याः नियमान् पालनेन अस्माकं जीवनं सुखदं भविष्यति?

**ब) पूर्णवाक्येन लिखत (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) सूर्यस्य किरणैः जनाः किं प्राप्नुवन्ति?

(ii) सूर्योपासनेन के लाभाः भवन्ति?

(iii) चिकित्सकाः सूर्यप्रकाशस्य विषये किं वदन्ति??

**इ.) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **3x1=3**

**(i)** 'सूर्यं विना जीवनं न सम्भवति। अत्र किं क्रियापदम्?

(क) सूर्यं (ख) सम्भवति (ग) विना जीवनं

**(ii)** प्राचीने भारते अनयोः विशेष्यपदं किम् ?

(क) प्राचीने (ख) भारते (ग) किमपि न

**(iii)** 'सायंकाले' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) सांयकाले (ख) प्रातःकाले (ग) प्रतिदिनं

**(iv)**'अनेन अस्माकं जीवनं सुखमयं, दीर्घायुष्यमयं च भविष्यति।' अस्मिन् वाक्ये 'अनेन' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) मानवेन (ख) प्रकृत्या (ग) सूर्यप्रकाशेण

**खण्डः ख - रचनात्मक–कार्यम्** **15 अङ्काः**

**2.** अ **भवान् रामकुमारः, भवान् दशमीं कक्षाम् उत्तीर्णवान्। विद्यालयात् प्रमाणपत्रस्य प्राप्तये निवेदनाय मञ्जूषायां प्रदत्तानां पदानां सहायतया एकं पत्रम् उत्तरपुस्तिकायां लिखतु।** **5**

**मञ्जूषा**

| |
|---|
| रामकुमारः, प्रमाणपत्रं, आवश्यकता, दशम्याः, सविनयं, निवेदनं, विद्यालये, महोदय!, प्रधानाचार्यः, केंद्रीयविद्यालयः, वाराणसी, आज्ञाकारी |

अथवा

आ **भवती सीता अस्ति । भवती ग्रीष्मावकाशे किं किं नूतनं कृतवती इति स्वसखीं कवितां अवकाशवृत्तान्तस्य निवेदनाय एकं पत्रं मञ्जूषायां प्रदत्तानां पदानां सहायतया कवितां प्रति लिखतु–**

DoE, Delhi

**मञ्जूषा**

| |
|---|
| शुभकामनाः, गङ्गास्नानं, कुशलेन, कृतवती, अवकाशं, अनुभवः, अत्यन्तः, सुखदः, मन्दिरदर्शनं, हरिद्वारं, गतवती, कविते!, सप्रेम, सीता, वलयं, क्रीतवती, नौकाविहारं |

**3.प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** **5x1=5**



**मञ्जूषा**

| |
|---|
| अध्यापिका, छात्राः, चित्राणि, शिक्षयति, पठन्ति, श्रृण्वन्ति, पृच्छन्ति,अङ्कनं, उत्पीठिका, पुस्तकम्, मार्जनी बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका, तिष्ठन्ति ध्यानेन, श्रृण्वन्ति, स्मितहासं, लेखनी, मन्दं–मन्दं, श्यामपट्टे, हसन्ति |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**

**"देहल्यां वायुप्रदूषणम्"**

DoE

**मञ्जूषा-**

| |
|---|
| अस्थमादिरोगाणां, रुग्णाः,धूलिः, कुर्वन्ति, आदिवसं, दूषितवायुः, श्वासकोशेषु, ग्रस्ताः, जायन्ते, जनाः, वसन्ति, सुखेन, परिवाराः, सुरक्षिताः, भवन्ति, अधिकारिणः, विद्यालयीयाः, आदिशन्ति, परिपालयन्ति, छात्राः, वृद्धाः |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत -** **5x1=5**

1. मैं संस्कृत पढ़ता हूँ। I study Sanskrit.
2. सूर्य पूर्व दिशा में उदय होता है। The sun rises in the east.
3. शिक्षक विद्यार्थियों को पाठ समझाता है। The teacher explains the lesson to the students.
4. हम सब विद्यालय जाते हैं। We all go to school.
5. जल ही जीवन है। Water is life.

**'ग'-खण्डः**

**अनुप्रयुक्त-व्याकरणम्**

**5.** अ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत** **4x1=4**

I. कथं **जनः+तं** परितोषयिष्यति।

II. **अश्वश्चेद्** धावने वीरः भारस्य वहने खरः।

III. **काचित्+इयमिति** मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

IV. मुच्यते **महतः+भयात्**।

अथवा

आ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत**

I. यानानां पङ्क्तयो **ह्यनन्ताः** कठिनं संसरणम्।

II. **बुद्धिर्बलवती** तन्वि सर्वकार्येषु सर्वदा।

III. पश्चाद् अन्यो द्वितीय: **कश्चित्+लक्ष्यते**।

IV. **अचिरादेव** चण्डवातेन मेघरवैश्च सह प्रवर्ष: समजायत।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** **4x1=4**

DoE, Delhi

(i) अतिथिः **चौरशङ्कया** तमन्वधावत् अगृह्णाच्च।

(क) चौरात् शङ्कया (ख) चौरस्य शङ्कया (ग) चौरया शङ्कया (घ) चौराणां शङ्कया

(ii) पक्षिणः **हर्षमिश्रितं** कलरवं कुर्वन्ति।

(क) हर्षस्य मिश्रितम् (ख) हर्षेण मिश्रितम् (ग) हर्षात् मिश्रितम् (घ) हर्षे मिश्रितम्

(iii) **पश्चात् व्रजन्ति** सख्याः

(क) पश्चाति (ख) अनुव्रजन्ति (ग) पश्चात्व्रजन्ति (घ) पश्चव्रजन्ति

(iv) पुर-कलरव सम्भ्रमितजनेभ्यो **धृतसुखसन्देशम्**।

(क) धृतः सुखसन्देशः यः सः, तम् (ख) धृतः सुखसन्देशः यं सः, तम्

(ग) धृतः सुखसन्देशः येन सः, तम् (घ) धृतः सुखसन्देशः यस्मात् सः, तम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- 4x1=4**

(i) आदिश्यतां किं **कृ+अनीयर्।**

(क) करणीयम् (ख) कृतम् (ग) कृतवान्

(ii) जम्बुकः – स्वामिन्! यत्रास्ते सा **धूर्त** + **टाप्** तत्र गम्यताम्।

(क) धूर्त (ख) धूर्ता (ग) धूर्तत्व

(iii) राजसिंहः **बुद्धिमान्** राजपुत्रः आसीत्।

(क) बुद्धि + मतुप् (ख) बुद्धि + वतुप् (ग) बुद्धि + मान्

(iv) किञ्चिद् परिश्रम्य वित्तम् **उपार्जितवान्।**

(क) उपार्जित+ तव्यत् (ख) उपार्जित+ क्तवतु (ग) उपार्जित+ मतुप्

**8. वाच्यानुसारं उचितविकल्पेन अधोलिखितानि रिक्तस्थानानि पूरयत। 3x1=3**

(i)) ………….. फलं खाद्यते।

(क) मालायाः (ख) मालायां (ग) मालया

(ii) बालकेन पुस्तकं …………… ।

(क) पठ्यते (ख) पठामि (ग) पठन्ति

(iii) अहं ग्रामं गच्छामि।

(क) ग्रामः (ख) ग्रामं (ग) ग्रामेण

**9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - 4x1=4**

(i) अहम् प्रातः 4.45……. जागर्मि।

DoE, Delhi

(क) पादोनपञ्चवादने (ख) सपादपञ्चवादने (ग) सार्धचतुर्वादने

(ii) रमेश: 8:15 ……… अल्पाहारं स्वीकरोति।

(क) सपाद-अष्टवादने (ख) पादोन-अष्टवादने (ग) पादोन-सप्तवादने

(iii) माता 8.00. …………. मन्दिरम् गच्छति।

(क) सार्ध- नववादने (ख) सपाद-नववादने (ग) पादोन-नववादने

(iv) छात्रा: 9:15 ……………… विद्यालयं गच्छन्ति।

(क) पादोननववादने (ख) सार्धनववादने (ग) सपादनववादने

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - 3x1=3**

(i) अवक्रता यथा चित्ते ....... भवेत् यदि।

(ii) अहम् ........ कुश इत्यात्मानं श्रावयामि?

(iii) व्याघ्रोऽपि ………. नष्टः गलबद्धश्रृगालकः।

**मञ्जूषा**

| |
|---|
| सहसा, अपि, तथा |

**11. अधोलिखितवाक्येषु रेखाङ्कितपदानि अशुद्धानि सन्ति। शुद्धपदं विकल्पेभ्यः चिनुत- 3x1=3**

(i) त्वं क्रीडाक्षेत्रे **क्रीडति।**

(क) क्रीडसि (ख) क्रीडाम: (ग) क्रीडामि

(ii) सिंहस्य **भयं** मृगः गुहायां निलीयते।

(क) भयेन (ख) भयात् (ग) भयस्य

(iii) सः भोजनं **करिष्यसि।**

(क) करिष्यथः (ख) करिष्यति (ग) करिष्यामि

**घ–खण्डः**

**पठितावबोधनम्**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं तदानीमेव किञ्चित् विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद्

DoE, Delhi

निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्। I

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 2x½=1**

i.) चौरः कुत्र प्रविष्टः?

ii.) चौरस्य पादध्वनिना कः प्रबुद्धः?

iii.) ग्रामस्य आरक्षीः कः आसीत्?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**

i.) चौरः गृहात् किं आदाय पलायितः?

ii.) ग्रामवासिनः अतिथिं किं मत्वा अभर्त्सयन्?

**III. यथानिर्देशम् उत्तरत - 2x1=2**

i.) 'सः चौरस्य पादध्वनिना प्रबुद्धः" वाक्येऽस्मिन् किं कर्तृपदं प्रयुक्तम्?

ii.) चौरः एव उच्चैः क्रोशितुमारभत"? अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

अथवा

आ निर्देशानुसारम् उत्तरत–

i.) 'बहिः आगत्य' इत्यस्य पदस्य कः पर्यायः अत्र अनुच्छेदे आगतः ?

ii.) 'मन्दस्वरेण' इत्यस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

**तोयैरल्पैरपि करुणया भीमभानौ निदाघे, मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः ।**
**सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां, धारासारानपि विकिरता विश्वतो वारिदेन ॥**

**I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**

i.) निदाघे किं भयङ्करम् अस्ति?

ii.) तरोः पुष्टिं कः व्यरचत्?

iii.) मालाकारः कैः तरोः पुष्टिं करोति?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**

i.) मालाकारः करुणया किं अकरोत्?



DoE, Delhi

ii.) वारिदः प्रावृषेः किमर्थं न तुल्यम्?

iii.) निदाघे तरवः केन पुष्टिं यच्छन्ति?

**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

i.) 'तोयैः अल्पैः" इत्यत्र किं विशेषणपदं प्रयुक्तम्?

ii.) "मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः" अस्मिन् वाक्ये किं कर्तृपदं प्रयुक्तम्?

अथवा

i.) 'जलम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

ii.) "व्यरचि भवता या तरोरस्य पुष्टिः" अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

व्याघ्रचित्रकौ– अरे किं वनराजपदाय सुपात्रः चीयते ? एतदर्थं तु आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः– तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अत एव विचारविमर्शः प्रचलति।

बकः– सर्वथा सम्यगुक्तम् सिंहमहोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति ।

सर्वे पक्षिणः- (उच्चैः) आम् आम्- कश्चित् खगः एव वनराजः भविष्यति इति।

**I . एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**

i.) व्याघ्रचित्रकौ किं पदं प्राप्तुम् इच्छन्तौ आस्ताम्?

ii.) वनराजपदाय सुपात्रः कस्य सम्मत्या चीयते स्म?

iii.) को राजेति पक्षिणः उक्तवन्तः?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 2x1=2**

i.) सिंहः व्याघ्रचित्रकयोः विषये किं उक्तवान्?

ii.) वनराजनिर्वाचने विषये बकस्य मतं किम् आसीत्?

iii.) वनराजनिर्वाचने विषये पक्षिणां मतं किम् आसीत्

**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

i.) ‘अरे किं वनराजपदाय सुपात्रः चीयते' वाक्येऽस्मिन् किं कर्तृपदं प्रयुक्तम्?

ii.) “सिंहेन बहुकालपर्यन्तं शासनं कृतम्” अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्?

अथवा

i.) 'खगः एव वनराजः भविष्यति।' अस्मिन् वाक्ये किं अव्ययपदं प्रयुक्तम्?

ii.) 'मौनम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

**15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत-** **4x1=4**

(i) **वनराजपदाय** सुपात्रः चीयते'

(ii) त्यक्त्वा **धर्मप्रदां** वाचं यः परूषाम् अभ्युदीरयेत्।

(iii) **पुत्रस्य** दैन्यं दृष्ट्वा अहं रोदिमि।

(iv) **वने** वसति चातकः?

**16.** अ **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -** **4x1=4**

**कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम् ।**
**प्रपश्यामि ग्रामान्ते निर्झर नदी-पयःपूरम् ।**
**एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्। शुचि...।**

**अन्वयः-** त्वं माम् अस्मान् **(i)…………..** बहुदूरं कञ्चित्**(ii)…………** नय। ग्रामान्ते निर्झर-नदी-पयः-पूर्णं (स्थानं) **(iii)... ……..** । एकान्ते **(iv).............** मे क्षणमपि सञ्चरणं स्यात्।

**मञ्जूषा**

| |
|---|
| प्रपश्यामि, नगरात् , कालं, कान्तारे |

**अथवा**

आ **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति बोधिताः ।**
**अनुक्तमप्यूहति पण्डितो जनः, परेङ्गितज्ञानफला हि बुद्धयः**

स्पष्टोऽर्थः वाच्यरूपेण उक्तः सन् अपि …………**(i)…………** अथवा पशुभिः अपि ग्राह्यः भवति। हयाः च नागाःच यदा आदेशं लभन्ते तदा तत् …………**(ii)…………….**। परन्तु …………**(iii)…………** जनः अप्रकटितम् अपि अर्थं स्वबुद्ध्या मनसि ऊहति। विदुषां बुद्धयः ……………**(iv)…………..**अङ्गितं (संकेतं) ज्ञात्वा तस्मात् फलमवाप्नुवन्ति।

**मञ्जूषा**



DoE, Delhi

| मूर्खैः, अनुसरन्ति, परानाम्, पण्डितः |
|---|

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत –** **8 x½ =4**

I. भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।
II. कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत।
III. कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।

IV. तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।
V. अयि शुभे! किमेवं रोदिषि? उच्यताम्
VI. सः ऋषभः हलम गन्तुमशक्तः क्षेत्रे पपात।
VII. क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।
VIII. सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत** **3x1 =3**

(i) तथापि दुर्बले **सुते** मातुः अभ्यधिका कृपा सहजैव।
(क) पुत्रे (ख) सूत्रे (ग) मित्रे
(ii) बहूनि अपत्यानि **मे** सन्तीति सत्यम्।
(क) माम् (ख) मयि (ग) मम
(iii) सः ऋषभः गन्तुम् **अशक्तः** आसीत्।
(क) शक्तियुक्तः (ख) शक्तिहीनः (ग) शक्तिमान्

DoE, Delhi